# नवमः पाठः

# द्रष्टव्यं शास्त्रचक्षुषा

## पाठप्रवेशः

स्वयमेव सम्पूर्णं विशिष्टाशयसन्पन्नं तथा भावस्य विचारस्य धर्मस्य सत्यस्य औचित्यबोधस्य युक्तिचिन्तायाः च प्रतिपादकं पद्यमेव सुभाषितम् इति कथ्यते । अनेकानि सुभाषितानि अज्ञातकर्तृकाणि भवन्ति । व्यासभासकालिदासादीनां कृतिभ्यः स्वीकृतानि बहूनि सुभाषितानि प्रथितानि । सुभाषितत्रिशती, सुभाषितरत्नभण्डागारः, सुभाषितावली, सुभाषितनीवी इत्यादयः पूर्णतया सुभाषितग्रन्थाः भवन्ति ।

## आमुखम्

समस्तमपि कार्यं शास्त्रदृष्ट्या तथा स्वमेधया विवेकेन च विचिन्त्य एव करणीयम् । युक्तिचिन्तां विना कृतं कार्यं निरर्थकं भविष्यति । कालिदासमहाकविना एवमुक्तम् – "प्रायेण सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः" इति । एतादृशानि आशयप्रतिपादकानि चत्वारि सुभाषितानि अत्र पठामः।

विचारेण विना कृतं कर्म आपदां कारणं भवति।




**विग्रहः**

| | | |
|---|---|---|
| अविवेकः | - | न विवेकः। |
| विमृश्यकारिणम् | - | विमर्शं करोति यः सःविमृश्यकारी, तम्। |
| गुणलुब्धाः | - | गुणैः लुब्धाः। |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| सहसा | - | विचिन्तनं विना |
| क्रियाम् | - | प्रवृत्तिम् |
| न विदधीत | - | न कुर्वीत |
| गुणलुब्धाः | - | गुणाभिलाषुकाः |
| सम्पदः | - | श्रियः |
| विमृश्यकारिणं | - | विचारशीलं पुरुषम् |
| स्वयमेव | - | परप्रेरणां विना |
| वृणुते हि। | - | स्वीकरोति खलु। |

**भावार्थः**

विचिन्तनं विना किमपि कार्यं न कर्तव्यम्। यतः विवेकराहित्यं बहूनां दोषाणां निदानं भवति। यः सम्यक् विचिन्त्य कार्यं करोति तं जनं गुणभिलाषुकाः सम्पदः स्वयमेव प्राप्नुवन्ति।

धनिकत्वं दरिद्रत्वं च अभिलाषानुसारं भवति।



## सुभाषितत्रिशती

**वयमिह परितुष्टाः वल्कलैस्त्वं दुकूलैः**
**सम इह परितोषो निर्विशेषो विशेषः।**
**स तु भवति दरिद्रो यस्य तृष्णा विशाला**
**मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः।।**

**पदच्छेदः**

वल्कलैस्त्वं - वल्कलैः + त्वम्।
सम इह - समः + इह।
दरिद्रो यस्य - दरिद्रः+ यस्य।
कोऽर्थवान् - कः + अर्थवान्।
को दरिद्रः - कः + दरिद्रः।



**विग्रहः**

निर्विशेषः - निर्गतो विशेषः।
अर्थवान् - अर्थः अस्य अस्ति इति अर्थवान्।


| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| इह | - | अत्र |
| वयम् | - | अस्मादृशाः जनाः |

| | | |
|---|---|---|
| वल्कलैः | - | वृक्षत्वग्भिः |
| परितुष्टाः | - | सन्तुष्टाः भवन्ति। |
| त्वं | - | युष्मत्सदृशः जनः |
| दुकूलैः च | - | पट्टाम्बरैः च। |
| इह | - | अत्र (आवयोः विषये) |
| परितोषः | - | सन्तोषः |
| समः | - | तुल्यः एव। |
| विशेषः, निर्विशेषः | - | प्रत्येकं वक्तुं विशेषो नास्ति एव। |
| यस्य | - | यस्य नरस्य |
| तृष्णा | - | अभिलाषः |
| विशाला | - | अतिविस्तृतः |
| स तु | - | स नरस्तु |
| दरिद्रः भवति | - | निस्वः भवति। |
| मनसि | - | चिन्तायां |
| परितुष्टे | - | सन्तृप्तायां सत्यां |
| कः अर्थवान् ? | - | कः सम्पन्नः? (भवति) |
| कः दरिद्रः ? | - | कः निस्वः च? (भवति) |

**भावार्थः**

अस्मिन् स्थाने (वनप्रदेशे) अस्मादृशो जनः केवलं वल्कलेनापि परितुष्टः भवति। युष्मत्सदृशः दुकूलादिभिः वस्त्रैश्च तत्रापि सन्तुष्टः भवति। आवयोः परितोषः समान एव। विशेषेण वक्तुम् अत्र किमपि नास्त्येव। यस्य अभिलाषः अतिविस्तृतः भवति स एव दरिद्रः। मनसि सन्तुष्टे सति धनिकत्वं नाम न। दरिद्रता अपि न।

विचिन्त्य एव गुणदोषविवेचनं करणीयम्।




**पदच्छेदः**

| | | |
|---|---|---|
| इत्येव | - | इति + एव। |
| चापि | - | च + अपि। |
| इत्यवद्यम् | - | इति +अवद्यम्। |
| परीक्ष्यान्यतरद्भजन्ते | - | परीक्ष्य +अन्यतरत् +भजन्ते। |

**विग्रहः**

| | | |
|---|---|---|
| परप्रत्ययनेयबुद्धिः | - | परेषां प्रत्ययः परप्रत्ययः, तेन नेया बुद्धिः यस्य सः। |


| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| पुराणं | - | पुरातनम् |
| इति एव | - | इति हेतुना एव |
| सर्वं | - | समस्तं |
| साधु न | - | निर्दोषं न। |
| नवम् इति | - | नूतनम् इत्यतः |
| काव्यम् | - | काव्यसाहित्यम् |
| न च अवद्यम् | - | दोषयुक्तं च न भवति। |
| सन्तः | - | विद्वज्जनाः |

| | | |
|---|---|---|
| परीक्ष्य | - | युक्तायुक्तविवेचनं कृत्वा |
| अन्यतरत् | - | द्वयोः एकम् |
| भजन्ते | - | स्वीकुर्वन्ति। |
| मूढः | - | अनभिज्ञः |
| परप्रत्ययनेयबुद्धिः (भवति) | - | अन्याभिमतेन प्रवर्तमानः भवति। |

**भावार्थः**

प्राचीनमिति कारणेनैव सर्वमपि काव्यं निर्दोषं न भवति। तथा नूतनमिति हेतुना सकलमपि काव्यं दोषयुक्तं च न। विद्वज्जनाः सम्यक् परीक्ष्य द्वाभ्यां गुणयुक्तम् एकं स्वीकुर्वन्ति। अज्ञस्तु गुणदोषविवेचनं कर्तुम् असमर्थः सन् अन्येषाम् अभिमतानुसारं प्रवर्तते।

**स्वप्रयत्नेन किं सत्यम् इति ज्ञात्वा तदेव स्वीकरणीयम्।**




**पदच्छेदः**

| | | |
|---|---|---|
| यदस्ति | - | यत् + अस्ति। |
| नास्तीति | - | न+ अस्ति + इति। |

| | | |
|---|---|---|
| वाक्यैर्न | - | वाक्यैः + न। |
| ममात्र | - | मम + अत्र। |
| यदत्र | - | यत् + अत्र। |

**अन्वयः** **अन्वयार्थः**

| | | |
|---|---|---|
| यत् अस्ति | - | यत् विद्यते |
| यत् न अस्ति | - | यत् न विद्यते |
| इति एषः यः संशयः | - | इति अयं यः सन्देहः अस्ति |
| अत्र | - | अस्मिन् विषये |
| परस्य | - | अन्यस्य |
| वाक्यैः | - | वचनैः |
| मम | - | अस्मादृशानाम् |
| न निश्चयः | - | निर्णयः नास्ति एव। |
| तपसा | - | कठिनप्रयत्नेन |
| शमेन च | - | मनोनियन्त्रणेन |
| तत्त्वम् अवेत्य | - | सत्यम् अवगम्य |
| यद् अत्र निश्चितम् | - | यत् (सत्यम्) अत्र निर्णीतम् |
| (तत्) स्वयं | - | तदेव स्वयं |
| ग्रहिष्यामि | - | स्वीकरिष्यामि। |

**भावार्थः**

यत् अस्ति यत् नास्ति इति विषये मम सन्देहोऽस्ति। तथापि अन्यस्य जनस्य वचने मम विश्वासो नास्ति एव। प्रयत्नेन मनोनियन्त्रणेन च स्वयमेव तथ्यं ज्ञात्वा तदेव स्वीकरिष्यामि।

## पठनप्रवर्तनानि



**श्लोकान् सतालमालपतु ।**

**श्रद्धेयाःअंशाः**

अवतरणशैली ।
आशयावबोधः ।
उच्चारणस्फुटता ।



**श्लोकानाम् अन्वयं/गद्यक्रमं लिखतु ।**

**श्रद्धेयाःअंशाः**

विशेषणविशेष्यादीनां ज्ञानम्
विभक्तिबोधः ।
वाक्यघटना ।



**श्लोकानाम् आशयं स्ववाक्यैः लिखतु ।**

**श्रद्धेयाःअंशाः**

भाषाशुद्धिः ।
आशयावबोधः।
वाक्यघटना ।



**इष्टतमस्य श्लोकस्य आस्वदनटिप्पणीं लिखतु ।**

**श्रद्धेयाःअंशाः**

टिप्पणीघटना ।
भाषाशुद्धिः ।
आशयवबोधः ।



**जीवने विजयप्रचोदकानां सुभाषितानां सम्पुटं निर्मातु ।**

**श्रद्धेयाःअंशाः**

चयनसामर्थ्यम् ।
युक्तायुक्तचिन्ता ।
क्रमीकरणसामर्थ्यम् ।

## क्रियापदपरिचयः

**विदधीत -** वि पूर्वक डुधाञ् धारणपोषणयोः उभयपदी धातोः आत्मनेपदे विधिलिङ् प्र.पु.ए.व। विदधीत - विधदीयाताम् - विदधीरन्।

**वृणुते -** वृञ् वरणे उभयपदी धातोः आत्मनेपदे लट् प्र.पु.ए.व।
वृणुते - वृण्वाते - वृण्वते।

**भजन्ते -** भज सेवायाम् आत्मनेपदी लट् प्र.पु.ब.व।
भजते - भजेते - भजन्ते।

**ग्रहिष्यामि -** ग्रह उपादाने परस्मैपदी लृट् उ.पु.ए.व।
ग्रहिष्यामि - ग्रहिष्यावः - ग्रहिष्यामः।

ध्येयवाक्यानि, सूक्तानि च समाहृत्य कक्ष्यायामवतारयतु।